नम्। स्वेष्टलब्धये देवदेयम्। इति जटाधरः॥ (यथा, कादम्बरी। "सिद्धायतनानि झलविविधदेवतोपयाचितकानि"॥)

उपयामः, पुं, (उप+यम्+घञ्।) विवाहः। इत्यमरः। (यज्ञाङ्गपात्रविशेषः। यथा यजुर्व्वेदे ७।४।११। "उपयामगृहीतोऽसि"। उपयाम्यतेऽनेन। उप+यम+णिच्+अच्। इति व्युत्पत्त्या सिद्धम्॥)

उपयुक्तः, त्रि, (उप+युज्+क्त।) योग्यः। उचितः॥

उपयोगः, पुं, (उपयुज्यते इति। उप+युज्+घञ्।) आचरणम्। इति विजयरक्षितः। इष्टसिद्ध्यर्थव्यापारः। इति विष्णुमिश्रः॥ ("अनङ्गलेखक्रिययोपयोगम्"। इति कुमारे।१।७॥ भोजनम्। "औषधान्नविहाराणामुपयोगं सुखावहम्"। इति निदानस्थाने प्रथमेऽध्याये वाभटेनोक्तम्॥)

उपयोगिता, स्त्री (उपयोगिन्+तल्।) उपयोगिनो भावः। फलसाधनता। प्रयोजनम्। आनुकूल्यम्॥

उपयोगी, [न्] त्रि, (उपयोगोऽस्यास्तीति। उपयोग+इनि।) उपयुक्तद्रव्यादिः। क्रियासाधनम्। अनुकूलः॥ ("तदुपयोगीनि शारीरकसूत्रादीनि"। इति वेदान्तसारे।२। उपभोगद्रव्यम्। यथा कथासरित्सागरे।१५ तरङ्गे।
"अस्ति कन्यारत्नं मे गृह्यतामुपयोगि चेत्"।)

उपरोषं, अ, 'उपजोषम्। आनन्दः। इत्यमरटीकायां भरतः॥

उपरक्तः, पुं, (उप+रञ्ज+क्त।) राहुग्रस्तः सूर्य्यचन्द्रश्च। इत्यमरः॥ राहुः। इति हेमचन्द्रः॥

उपरक्तः, त्रि, (उप+रञ्ज+क्त।) व्यसनार्त्तः। दैवमानुषान्यतरपीडायुक्तः। इत्यमरः॥

उपरक्षणं, क्ली (उपगतं रक्षणं यत्र।) रक्षार्थं सैन्यस्थापनम्। चौकी इति ख्यातम्। तत्पर्य्यायः। सज्जनम् २। इत्यमरः॥

उपरतः, त्रि, (उप+रम+क्त।) मृतः। इति स्मृतिः॥ (यथाह नारदः।
"पितुर्य्युपरते पुत्त्रा विभजेयुर्धनं पितुः"॥)
विरतः॥

उपरतस्पृहः, त्रि, (उपरता नष्टा स्पृहा धनाद्याकाङ्क्षा यस्य।) सत्यपि सत्त्वे स्वगतधनेच्छारहितः। स्वसमानाधिकरणस्वसमानकालीनेच्छा प्रागभावासमानकालीनेच्छाध्वंसवान्। इति दायतत्त्वम्॥ इच्छारहितः॥ ("पितुर्य्युपरतस्पृहे"। इति याज्ञवल्क्यः॥)

उपरतिः, स्त्री, (उप+रम्+क्तिन्।) विरतिः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये ९१।८।
"विश्वस्योपरतौ शक्ते नारायणि! नमोऽस्तु ते"॥)
"निगृहीतेन्द्रियाणां विषयेभ्य उपरमणम्।
अथवा विहितकर्म्मणां विधिना परित्यागः"।
इति वेदान्तः॥

उपरमः, पुं, (उप+रम+घञ्। निपातनात् न वृद्धिः।) उपरतिः। इति हेमचन्द्रः॥ ("केनोपरमे कल्कद्वयं नियोजयेत्"। इति वैद्यके॥)

उपरसः, पुं, (उपमितं रसेन।) उपधातुः। तद्यथा। खेचरम्। अञ्जनम्। कङ्कुष्ठम्। गन्धारी। गैरिकम्। क्षितिनागः। शैलेयं। इति राजनिर्घण्टः॥
"गन्धो हिङ्गुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्कणम्, राजावर्त्तकचुम्बकौ स्फटिकया शङ्खः खटी गैरिकम्। कासीसं रसकं कपर्द्दसिकता बोलाश्च कङ्कुष्ठकम्, सौराष्ट्री च मता अमी उपरसा सूतस्य किञ्चिद्गुणैः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

उपरागः, पुं, (उप+रञ्ज+घञ्।) राहुग्रस्तचन्द्रः। सूर्य्यश्च। इत्यमरः॥ ("उपरागान्ते शशिनः समुपगता रोहिणीयोगम्"। इति शाकुन्तले। निकटस्थितत्वात् निजगुणादेरन्यत्रारोपणम्। यथा स्फटिकस्तम्भे रक्तपुष्पाणां रक्तिमारोपः।) राहुः। विगानम्। परीवादः। इति हेमचन्द्रः॥ दुर्नयः। ग्रहकल्लोलः। व्यसनम्। इति मेदिनी॥ (यथा रघौ १६।७। "बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम्"॥)

उपरामः, पुं, (उप+रम्+घञ्।) निवृत्तिः। तत्पर्य्यायः। आरतिः २ अवरतिः ३ विरतिः ४ इत्यमरः॥ विरामः ५ उपरमः ६ इति भरतः॥ आरामः ७ उपरतिः ८ इति हेमचन्द्रः॥

उपरि, अ, (ऊर्द्ध्वे ऊर्द्ध्वायां ऊर्द्ध्वात् ऊर्द्ध्वायाः ऊर्द्ध्वं ऊर्द्ध्वां वा वसत्यागतो रमणीयं वा। "उपर्य्युपरिष्टात्"। ५।३।३१। इति ऊर्द्ध्वस्योपादेशो रिल् प्रत्ययश्च॥) ऊर्द्ध्वम्। इति व्याकरणम्॥ उपर इति भाषा।
("त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः।
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति"॥
इति मेघदूते उत्तरमेघे ३४ श्लोकः।
"अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता"।
इति रघुः।२।६०॥)

उपरिष्टात्, अ, (ऊर्द्ध्वे ऊर्द्ध्वायां ऊर्द्ध्वात् ऊर्द्ध्वायाः ऊर्द्ध्वं ऊर्द्ध्वां वा वसति आगतो रमणीयं वा। "उपरि उपरिष्टात्"।५।३।३१। इत्यूर्द्ध्वस्य उपादेशो रिष्टातिल् प्रत्ययश्च।) उपरि। ऊर्द्ध्वम्। इति हेमचन्द्रः॥ (यथा रामायणे ४ काण्डे।
"नाधस्तान्नोपरिष्टाच्च गतिर्नागेषु न चाम्बरे"॥)

उपरीतकः, पुं, शृङ्गारबन्धविशेषः। आसन बाँधन इत्यादि भाषा। तस्य लक्षणं यथा।
"एकपादमुरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्।
नारीं कामयते कामी बन्धः स्यादुपरीतकः"॥
इति रतिमञ्जरी॥ अत्र विपरीतकोऽपि पाठः॥

उपरूपकं, क्ली, (उपमितं रूपकेण।) नाटकविशेषः। स तु अष्टादशविधः। यथा।
"नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकन्तथा॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका।
दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः।
विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम्"॥
इति साहित्यदर्पणे ६ परिच्छेदः॥

उपरोधः, पुं, (उप+रुध्+घञ्।) अनुरोधः॥ (प्रतिबन्धः। "अन्येषामपि भैक्ष्योपजीविनां इत्युपरोधं करोमि"। इति महाभारते आदिपर्व्वणि। ३।४५। "तपोधननिवासिनामुपरोधो माभूत्"। इति शाकुन्तले प्रथमाङ्के॥)

उपरोधकं, क्ली, (उप+रुध्+ण्वुल्।) गर्भागारम्। वासगृहम्। इति शब्दरत्नावली॥

उपर्य्युपरि, अ, ऊर्द्ध्वोर्द्ध्वं। उपर उपरि इति भाषा। सामीप्यम्। यथा "उपर्य्युपरि ग्रामम्"। इति व्याकरणम्॥

उपलः, पुं, (उपलाति। उप+ला+क। यद्वा, उं शम्भुं पलति यः। उ+पल+अच्।) पाषाणः। (यथा,—
"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम्"।
इति मेघदूते पूर्व्वमेघे १९ श्लोकः।) रत्नम्। इति मेदिनी॥ (यथा मनुः।११।१६७।
"मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च।
अयःकांस्योपलानाञ्च द्वादशाहं कणान्नता"॥
बालुका। यथा, "भिषगुपलप्रक्षिणी नना"। इति ऋग्वेदे। ९।११२।३। "उपलेषु बालुकासु" इति भाष्यम्॥)

उपलक्षणं, क्ली, (उप+लक्ष्+ल्युट्।) अजहत्स्वार्थलक्षणा।
("स्वसिद्धये पराक्षेपः परार्थे स्वसमर्पणम्।
उपादानं लक्षणञ्चेत्युक्ता शुद्धैव सा द्विधा॥
यथा कुन्ताः प्रविशन्ति। इत्युपादानम्। गङ्गायां घोषः। इत्युपलक्षणम्"। इति काव्यप्रकाशः॥)
एकपदेन तदर्थान्यपदार्थकथनम्। यथा, शुद्धितत्त्वम्।
"देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम्।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम्"॥
अत्र पादुकाद्वयमित्युपलक्षणं द्रव्यान्तरमपि॥

उपलक्ष्यः, पुं, (उप+लक्ष+ण्यत्।) आश्रयः। अवलम्बनम्॥

उपलब्धिप्रियः, पुं, (उपलब्धिः प्रिया यस्य।) वानरनामवनजन्तुः। इति राजनिर्घण्टः॥

उपलब्धार्था, स्त्री, (उपलब्धः अर्थो यस्याः।) आख्यायिका। इत्यमरः॥ हितोपदेशादिकथा॥

उपलब्धिः, स्त्री, (उप+लभ+क्तिन्।) मतिः। प्राप्तिः। (यथा, रघुः ५।५६। "तथा हि मे स्यात् स्वपदोपलब्धिः"।) ज्ञानम्। इति मेदिनी॥ (यथा महाभारते १४। अनुगीतापर्व्वणि।२२।२९।
"कामन्तु नः स्वेषु गुणेषु सङ्गः
कामश्च नान्योन्यगुणोपलब्धिः।
अस्मान् विना नास्ति तवोपलब्धि-
स्तावदृते त्वां न भजेत् प्रहर्षः"॥)

उपलभेदी, पुं, (उपलं भिनत्तीति। उपल+भिद्+णिनि।) पाषाणभेदी वृक्षः। इति राजनिर्घण्टः॥ (अश्मभेदशब्देऽस्य गुणादयो ज्ञातव्याः॥)

उपलम्भः, पुं, (उप+लभ+घञ्। उपसर्गात् खलघञोरिति नुम्।) अनुभवः। इत्यमरः॥ (यथा रघुः १४।२।
"विस्पष्टमस्रान्धतया न दृष्टौ